Roll No……………………….
Signature of Invigilator ………

| Paper Code |
| --- |
| BV-101 |

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination March-2021

### बी. ए. व्याकरण, प्रथमसत्रम्
### व्याकरणम्, प्रथमपत्रम्
### संस्कृतव्याकरणम् (क)

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( खण्ड -क )

( काशिकातः )

१. पृष्टेषु पञ्चसु सूत्रेषु त्रयाणां काशिकारीत्या व्याख्यानम्। ( 5 x3 =15 )

1. ऋऌक्।
2. इको गुणवृद्धी।
3. इग् यणः सम्प्रसारणम्।
4. अचश्च।
5. गोस्त्रियोरूपसर्जनस्य।

२. पृष्टेषु सप्तसु सूत्रेषु पञ्चानां पदकृत्यम्। ( 3 x5 =15 )

1. न धातुलोप आर्धधातुके।
2. विभाषा दिक्समासे बहुब्रीहौ।
3. स्थानेऽन्तरतमः।
4. सार्वधातुकमपित्।
5. न क्त्वासेट्।
6. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।
7. तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्।

३. पृष्टेषु सप्तसु वार्तिकेषु पञ्चानां व्याख्यानम्। ( 3 x5 =15 )

1. मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते।
2. ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या।
3. समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः।
4. यस्मिन् विधिस्तदादावलग्रहणे।
5. श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम्।
6. ईयसो बहुव्रीहेः प्रतिषेधो वक्तव्यः।
7. युष्मदि गुरावेकेषाम्।

४. प्रदत्तासु तिसृषु कारिकासु द्वयोर्व्याख्यानम्। ( 5 x2 =10 )

1. प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
   आचारादप्रधात्वाल्लापश्च बलवत्तरः।।
2. ईषदर्थ क्रियायोग मर्यादाभिविधौ च यः।
   एतमातं ङित विद्याद्वाक्यस्मरणयोरङित्।।
3. इच्च कस्य तकारेत्वं दीर्घो मा भूदृतेऽपि सः।
   अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः।।

५. प्रदत्तेषु पञ्चसु शब्देषु/शङ्कासु त्रयाणां सिद्धिः/समाधानम्। ( 5 x3 =15 )

1. ‘मरीमृजः। इत्येतद् शब्दरूपं साध्नोतु।
2. ‘अवधीत्’। इत्येतद् शब्दरूपं साध्नोतु।
3. ‘जिघृक्षति’। इत्येतद् शब्दरूपं साध्नोतु।
4. ‘आघ्नीय’ इत्यत्र ‘लिङः सलोपोऽनन्त्यस्य’ इत्यनेन सकारलोपेसति प्रत्ययलक्षणेन अनुनासिकस्य नकारस्य किमर्थं लोपो न भवति?
5. ‘सर्वो द्वन्द्वो विभाषैकवद् भवति’। इति परिभाषा कथं ज्ञाप्यते?

---------------x---------------